No. ४७५६

Title मृत्युञ्जयस्तोत्रम्

Author ×

Extent २ पत्रे Age ×

Subject भक्तिशास्त्रम्

मृत्युञ्जयस्तोत्रम्

प७ पद्यं

मृ० स्तो ॐ गणेशाय नमः ॥ ॐ कैलासोत्तरे शृंगे शुद्धस्फटिकसंकुले तमोगुणविहीने तु जगन्मृत्युविवर्जिते १ सर्वा
१ र्थसंपदाधारे ब्रह्मा लोकपितामहः ब्रह्मोवाच ॥ केनोपायेन देवेश चिरायुर्लोमशो भवेत् तन्मे ब्रूहि महेशा
न देवानां हितकाम्यया २ श्रीसदाशिव उवाच शृणु वत्स प्रवक्ष्यामि चिरायुर्मुनिसत्तमः संजातः कर्मणा
येन व्याधिमृत्युविवर्जितः ३ तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते कल्पान्तभयनाशाय स्तुतो मृत्यु
ञ्जयः शिवः तस्य संकीर्तनान्नित्यं मुनिर्मृत्युविवर्जितः त्वमेव कीर्तय ब्रह्मन् मृत्युंजेतुं नरोत्तम: ५॥
ॐ देवाधिदेव देवेश सर्वप्राणिभृतां वर प्राणिनामपि नाथस्त्वं मृत्युंजय नमोऽस्तु ते ६ जगज्जीवी जग
त्प्राणः स्रष्टा त्वं जगतः प्रभुः कारणं सर्वतीर्थानां मृत्युंजय० ७ त्वं हि नादे बभूतासि जीवो जीवस्य कारणं
जगतां रक्षकस्त्वं वै मृत्युं० ८ हिमाद्रिशिखराकार सुधावीचिमनोहर पुंडरीकपरंज्योति मृत्युं ९ नहि
त्वा येन कालेन म देवासुरमानुषाः गंधर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा १० साध्याश्च वसवो रुद्रास्त
थाश्विनीसुतावुभौ मरुतश्च दिशो नागाः स्थावरा जंगमास्तथा ११ त्वामाराध्य पदं याता ध्यानान्मृत्युंज० १२ मृ:
१

येध्यायंतिपरांमूर्तिंपूजयंत्यमरादयः नतेमृत्युंवशंयातिमृत्युं १३ त्वमोंकारोसिवेदानांवेदानांचसदा
शिवः आधारशक्तिःशक्तीनांमृत्युंज. १४ स्थावरेजंगमेनापियावत्तिष्ठतिदेहगाः जीवंदपत्यातेलो
काःमृत्युंज. १५ सूमसूर्याग्निमध्यस्थव्योमव्यापीन्सदाशिवः कालत्रयंमहाकालंमृत्युंज. १६ प्रबु
द्धेचाप्रबुद्धेचत्वमेवसृजतेजगत् सृष्टिरूपायदेवशमृत्युंज. १७ व्योम्नित्वंव्योमरूपोसितेजःसर्वत्रतेज
सि प्राणिनांज्ञानरूपोसिमृत्युंज. १८ जगत्जीवोजगत्प्राणाः स्रष्टात्वंजगतःप्रभुः तेनात्वंसिद्धि
याणांचसर्वज्ञानप्रबोधकः १९ सांख्ययोगश्चहंसश्चमृत्युंज. रूपातीतःस्वरूपश्चपिंडस्थपदमेवच
२० चतुर्योगकलाधारमृत्युंज. रेचकेवह्निरूपोसिसोमरूपोसिपूरके २१ कुंभकेशिवरूपोसिमृत्युंज.
क्षयंकरोषिपापानांपुण्यानामपिवर्द्धने २२ हेतुत्वंअपवर्गस्यनित्यंमृत्युंज. सर्वमायाकलातीतसर्वेंद्रिय
नरः २३ सर्वेंद्रियकलाधीशमृत्युंज. रूपंगोधारसःस्पर्शोसहदसंस्कारएवच २४ प्रकाशकस्त्वमेतेषां
मृत्युंज. चतुर्विधानांसृष्टीनांहेतुस्त्वंकारणःपरः २५ भावाभावपरिछिन्नंमृत्युंज. त्वमेकोनिष्कलोलो

मृ०
२

के सकलं भुवनत्रयं २६ अतिसूक्ष्मातिरूपत्वं मृत्युः सर्वमायासर्वभूतानां गुणानां त्वमधीश्वरः २७
सर्वानंदमयाधारं मृत्युं त्वं यज्ञ सर्वयज्ञानां त्वं बुद्धिर्बुद्धिलक्षणा २८ शब्दब्रह्म त्वमोंकारं मृत्युंजय नमो
स्तुते· एवं संकीर्त्तयेद्यस्तु शुचितद्गतमानसः २९ भक्त्या मृत्युंनियोब्रह्मन् सर्वं मृत्युवशो भवेत्॥
नतु मृत्युभयं तस्य प्राप्तकालं च लंघयेत् ३० अपमृत्युभयं तस्य प्रणाशं याति संशयः· व्याधयो
नोपपद्यंते नोपसर्गभयं भवेत् ३१ प्रत्यासन्नतरे काले शतकावर्त्तने कृते मृत्युं न जायते तस्य रोगा
न्मुच्यति निश्चितं ३२ पंचदश्यां चतुर्दश्यामष्टम्यां वा पौर्णमास्यां तथापि वा शतमावर्तयेद्यस्तु शतवर्षं स
जीवति ३३ तेजस्वी बलसंपन्नो लभते श्रियमुत्तमं त्रिविधं नाशयेत्पापं मनोवाक्कायकर्मजं अ
भिचारिककर्माणि कर्मण्यपाथर्वणानि च क्षीयंते नात्र संदेहो दुःस्वप्नं च विनश्यति ३५ इदं रहस्यं पर
मं देवदेवस्य शूलिनः दुःस्वप्ननाशनं पुण्यं सर्वविघ्नविनाशनं ३६॥ इति परमेश्वर चतुर्विंशति
माहात्म्ये शिवभाषिते नंदिकेश्वर संवादे शिवब्रह्मसंवादे मृत्युंजयस्तोत्रं संपूर्णम्॥ शुभमस्तु

राम:
२

श्री ३८